श्री धर्मशास्ता सहस्रनाम स्तोत्रं

ॐ पूर्णपुष्कलांबासमेत श्रीहरिहरपुत्रस्वामिने नमः ।
श्रीधर्मशास्तासहस्रनामस्तोत्रं ।
अस्य श्रीहरिहरपुत्रसहस्रनामस्तोत्रमालामंत्रस्य
अर्धनारीश्वर ऋषिः । अनुष्टुप्छंदः । श्रीहरिहरपुत्रो देवता ।
ह्रां बिजं, ह्रीं शक्तिः, ह्रूं कीलकं ।
श्रीहरिहरपुत्रप्रसादसिध्यर्थे जपे विनियोगः ॥

अथ करन्यासः ।
ह्रां अंगुष्ठाभ्यां नमः ।
ह्रीं तर्जनीभ्यां नमः ।
ह्रूं मध्यमाभ्यां नमः ।
ह्रैं अनामिकाभ्यां नमः ।
ह्रौं कनिष्ठिकाभ्यां नमः ।
ह्रः करतलकरपृष्ठाभ्यां नमः ॥

अथांगन्यासः ।
ह्रां हृदयाय नमः ।
ह्रीं शिरसे स्वाहा ।
ह्रूं शिखायै वषट् ।
ह्रैं कवचाय हं ।
ह्रौं नेत्रत्रयाय वौषट् ।
ह्रः अस्त्राय फट् ।
भूर्भुवस्सुवरों इति दिग्बंधः ॥

ध्यानं -
ध्यायेदुमापतिरमापतिभाग्यपुत्रं
वेत्रोज्ज्वलत्करतलं भसिताभिरामं ।
विश्वैकविश्ववपुषं मृगयाविनोदं
वांछानुरूपफलदं वरभुतनाथं ॥

आश्रयामकोमलविशालतनुं विचित्र-
वासो वसानमरुणोत्पलदामहस्तं ।
उत्तुंगरत्नमकुटं कुटिलाग्रकेशं
शास्तारमिष्टवरदं शरणं प्रपद्ये ॥

पंचोपचाराः ।
लं पृथिव्यात्मने गंधं समर्पयामि ।
हं आकाशात्मने पुष्पाणि समर्पयामि ।
यं वाय्वात्मने धूपमाघ्रापयामि ।
रं अग्न्यात्मने दीपं दर्शयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं निवेदयामि ।
सं सर्वात्मने सर्वोपचारपूजां समर्पयामि ।
मूलमंत्रः - ॐ घ्रूं नमः पराय गोप्त्रे नमः ॥

ॐ नमो भगवते भूतनाथाय ।
ॐ शिवपुत्रो महातेजाः शिवकार्यधुरंधरः ।
शिवप्रदश्शिवज्ञानी शैवधर्मसुरक्षकः ॥1॥

शंखधारी सुराध्यक्षश्चंद्रमौलिस्सुरोत्तमः ।
कामेशः कामतेजस्वी कामादिफलसंयुतः ॥2॥

कल्याणः कोमलांगश्च कल्याणफलदायकः ।
करुणाब्धिः कर्मदक्षः करुणारससागरः ॥3॥

जगत्प्रियो जगद्रक्षो जगदानंददायकः ।
जयादि शाक्तिसंसेव्यो जनाह्लादो जिगीषुकः ॥4॥

जितेंद्रियो जितक्रोधो जितदेवारिसंचयः ।
जैमिन्यादिर्षिसंसेव्यो जरामरणनाशकः ॥5॥

जनार्दनसुतो ज्येष्ठो ज्येष्ठादिगणसेवितः ।
जन्महीनो जितामित्रो जनकेनाभिपूजितः ॥6॥

परमेष्ठी पशुपतिः पंकजासनपूजितः ।
पुरहंता पुरत्राता परमैश्वर्यदायकः ॥7॥

पवनादि सुरैः सेव्यः पंचब्रह्मपरायणः ।
पार्वतीतनयो ब्रह्म परानंदः परात्परः ॥8॥

ब्रह्मिष्टो ज्ञाननिरतो गुणागुणनिरुपकः ।
गुणाध्यक्षो गुणनिधिः गोपालेनाभिपुजितः ॥9॥

गोरक्षको गोधनदो गजारुढो गजप्रियः ।
गजग्रिवो गजस्कंधो गभस्तिर्गोपतिः प्रभुः ॥10॥

ग्रामपालो गजाध्यक्षो दिग्गजेनाभिपूजितः ।
गणाध्यक्षो गणपतिर्गवां पतिरहर्पतिः ॥11॥

जटाधरो जलनिभो जैमिन्यादिर्षिपूजितः ।
जलंधरनिहंता च शोणाक्षश्शोणवासकः ॥12॥

सुराधिपश्शोकहंता शोभाक्षस्सुर्यतैजसः ।
सुरार्चितस्सुरैर्वंद्यः शोणांगः शाल्मलीपतिः ॥13॥

सुज्योतिश्शरवीरघ्नः शरच्चंद्रनिभाननः ।
सनकादिमुनिध्येयः सर्वज्ञानप्रदो विभुः ॥14॥

हलायुधो हंसनिभो हाहाहूहू मुखस्तुतः ।
हरिहरप्रियो हंसो हर्यक्षासनतत्परः ॥15॥

पावनः पावकनिभो भक्तपापविनाशनः ।
भसितांगो भयत्राता भानुमान् भयनाशनः ॥16॥

त्रिपुंड्रकस्त्रिनयनः त्रिपुंड्रांगितमस्तकः ।
त्रिपुरघ्नो देववरो देवारिकुलनाशकः ॥17॥

देवसेनाधिपस्तेजस्तेजोराशिर्दशाननः ।
दारुणो दोषहंता च दोर्दंडो दंडनायकः ॥18॥

धनुष्पाणिर्धराध्यक्षो धनिको धर्मवत्सलः ।
धर्मज्ञो धर्मनिरतो धनुश्शास्त्रपरायणः ॥19॥

स्थूलकर्णः स्थूलतनुः स्थूलाक्षः स्थूलबाहुकः ।
तनूत्तमस्तनुत्राणस्तारकस्तेजसांपतिः ॥20॥

योगीश्वरो योगनिधिर्योगेशो योगसंस्थितः ।
मंदारवाटिकामत्तो मलयाचलवासभूः ॥21॥

मंदारकुसुमप्रख्यो मंदमारुतसेवितः ।
महाभश्च महावक्षा मनोहरमदार्चितः ॥22॥

महोन्नतो महाकायो महानेत्रो महाहनुः ।
मरुत्पूज्यो मानधनो मोहनो मोक्षदायकः ॥23॥

मित्रो मेधा महौजस्वी महावर्षप्रदायकः ।
भाषको भाष्यशास्त्रज्ञो भानुमान् भानुतैजसः ॥24॥

भिषग्भवानीपुत्रश्च भवतारणकारणः ।
नीलांबरो नीलनिभो नीलग्रीवो निरंजनः ॥25॥

नेत्रत्रयो निषादज्ञो नानारत्नोपशोभितः ।
रत्नप्रभो रमापुत्रो रमया परितोषितः ॥26॥

राजसेव्यो राजधनः रणदोर्दंडमंडितः ।
रमणो रेणुकासेव्यो राजनीचरदारणः ॥27॥

ईशान इभराट्सेव्य ईषणात्रयनाशनः ।
इडावासो हेमनिभो हैमप्राकारशोभितः ॥28॥

हयप्रियोहयग्रीवो हंसो हरिहरात्मजः ।
हाटकस्फटिकप्रख्यो हंसारूढेन सेवितः ॥29॥

वनवासो वनाध्यक्षो वामदेवो वराननः ।
वैवस्वतपतिर्विष्णुः विराड्रूपो विशांपतिः ॥30॥

वेणुनादो वरग्रिवो वराभयकरान्वितः ।
वर्चस्वी विपुलग्रीवो विपुलाक्षो विनोदवान् ॥31॥

वैणवारण्यवासश्च वामदेवेनसेवितः ।
वेत्रहस्तो वेदविधिर्वंशदेवो वरांगकः ॥32॥

ह्रींकारो ह्रीम्मना हृष्टो हिरण्यः हेमसंभवः ।
हूताशो हूतनिष्पन्नो हूँकाराकृतिसुप्रभः ॥33॥

हव्यवाहो हव्यकरश्चाट्टहासोऽपराहतः ।
अणुरूपो रूपकरश्चाजरोऽतनुरूपकः ॥34॥

हंसमंत्रश्च हुतभुक् हेमांबरस्सुलक्षणः ।
नीपप्रियो नीलवासाः निधिपालो निरातपः ॥35॥

क्रोडहस्तस्तपस्त्राता तपोरक्षस्तपाह्वयः ।
मूर्ताभिषिक्तो मानी च मंत्ररूपोः मृडो मनुः ॥36॥

मेधावी मेदसो मुष्णुः मकरो मकरालयः ।
मार्त्तांडो मंजुकेशश्च मासपालो महौषधिः ॥37॥

श्रोत्रियश्शोभमानश्च सविता सर्वदेशिकः ।
चंद्रहासश्शमश्शक्तः शशिभासश्शमाधिकः ॥38॥

सुदंतस्सुकपोलश्च षड्वर्णस्संपदोऽधिपः ।
गरलः कालकंठश्च गोनेता गोमुखप्रभुः ॥39॥

कौशिकः कालदेवश्च क्रोशकः क्रौंचभेदकः ।
क्रियाकरः कृपालुश्च करवीरकरेरुहः ॥40॥

कंदर्पदर्पहारी च कामदाता कपालकः ।
कैलासवासो वरदो विरोचनो विभावसुः ॥41॥

बभ्रुवाहो बलाध्यक्षः फणामणिविभुषणः ।
सुंदरस्सुमुखः स्वच्छः सफासश्च सफाकरः ॥42॥

शरानिवृत्तश्शक्राप्तः शरणागतपालकः ।
तीक्ष्णदंष्ट्रो दीर्घजिह्वः पिंगलाक्षः पिशाचहा ॥43॥

अभेद्यश्चांगदार्ढ्यश्च भोजपालोऽथ भूपतिः ।
गृध्रनासोऽविषह्यश्च दिग्देहो दैन्यदाहकः ॥44॥

बाडवापूरितमुखो व्यापको विषमोचकः ।
वसंतस्समरक्रुद्धः पुंगवः पंगजासनः ॥45॥

विश्वदर्पो निश्चितज्ञो नागाभरणभूषितः ।
भरतो भैरवाकारो भरणो वामनक्रियः ॥46॥

सिंहास्यस्सिंहरूपश्च सेनापतिस्सकारकः ।
सनातनस्सिद्धरूपी सिद्धधर्मपरायणः ॥47॥

आदित्यरूपश्चापधरश्चामृताब्धिनिवासभूः ।
युवराजो योगिवर्य उषस्तेजा उडुप्रभः ॥48॥

देवादिदेवो दैवज्ञस्ताम्रोष्ठस्ताम्रलोचनः ।
पिंगलाक्षः पिच्छचूडः फणामणिविभूषितः ॥49॥

भुजंगभूषणो भोगो भोगानंदकरोऽव्ययः ।
पंचहस्तेन संपूज्यः पङ्चबाणेनसेवितः ॥50॥

भवश्शर्वो भानुमयः प्राजापत्यस्वरुपकः ।
स्वच्छंदश्छंदश्शस्त्रज्ञो दांतो देवो मनुः प्रभुः ॥51॥

दशभुक्च दशाध्यक्षो दानवानां विनाशनः ।
सहस्राक्षश्शरोत्पन्नः शतानंदसमागमः ॥52॥

गृध्राद्रिवासो गंभिरो गंधग्राहोगणेश्वरः ।
गोमेधो गंढकावासो गोकुलैः परिवारितः ॥53॥

परिवेषः पदज्ञानी प्रियंगुद्रुमवासकः ।
गुहावासो गुरुवरो वंदनीयो वदान्यकः ॥54॥

वृत्ताकारो वेणुपाणीर्वीणादंडधरोहरः ।
हैमीड्यो होत्रुसुभगो हौत्रज्ञश्चौजसां पतिः ॥55॥

पवमानः प्रजातंतुप्रदो दंडविनाशनः ।
निमीड्यो निमिषार्धज्ञो निमिषाकारकारणः ॥56॥

लिगुडाभो लिडाकारो लक्ष्मीवंद्यो वरप्रभुः ।
इडाज्ञः पिंगलावासः सुषुम्नामध्यसंभवः ॥57॥

भिक्षाटनो भीमवर्चा वरकीर्तिस्सभेश्वरः ।
वाचोऽतीतो वरनिधिः परिवेत्ताप्रमाणकः ॥58॥

अप्रमेयोऽनिरुद्धश्चाप्यनंतादित्यसुप्रभः ।
वेषप्रियो विषग्राहो वरदानकरोत्तमः ॥59॥

विपिनो वेदसारश्च वेदांतैः परितोषितः ।
वक्रागमो वर्चवचा बलदाता विमानवान् ॥60॥

वज्रकांतो वंशकरो वटुरक्षाविशारदः ।
वप्रक्रीडो विप्रपूज्यो वेलाराशिश्चलालकः ॥61॥

कोलाहलः क्रोडनेत्रःक्रोडास्यश्च कपालभृत् ।
कुंजरेड्यो मंजुवासाःक्रियामानः क्रियाप्रदः ॥62॥

क्रीडानाथः कीलहस्तः क्रोशमानो बलाधिकः ।
कनको होतृभागी च खवासः खचरः खगः ॥63॥

गणको गुणनिर्दुष्टो गुणत्यागी कुशाधिपः ।
पाटलः पत्रधारी च पलाशः पुत्रवर्धनः ॥64॥

पितृसच्चरितः प्रेष्ठः पापभस्मः पुनश्शुचिः ।
भालनेत्रः फुल्लकेशः फुल्लकल्हारभूषितः ॥65॥

फणिसेव्यः पट्टभद्रः पटुर्वाग्मी वयोऽधिकः ।
चोरनाट्यश्चोरवेषश्चोरघ्नश्चौर्यवर्धनः ॥66॥

चंचलाक्षश्चामरको मरीचिर्मदगामिकः ।
मृडाभो मेषवाहश्च मैथिल्यो मोचकोमनुः ॥67॥

मनुरूपो मंत्रदेवो मंत्रराशिर्महादृढः ।
स्थूपिज्ञो धनदाता च देववंद्यश्चतारणः ॥68॥

यज्ञप्रियो यमाध्यक्ष इभक्रीड इभेक्षणः ।
दधिप्रियो दुराधर्षो दारुपालो दनूजहा ॥69॥

दामोदरोदामधरो दक्षिणामूर्तिरूपकः ।
शचीपूज्यश्शंखकर्णश्चंद्रचूडो मनुप्रियः ॥70॥

गुडरूपो गुडाकेशः कुलधर्मपरायणः ।
कालकंठो गाढगात्रो गोत्ररूपः कुलेश्वरः ॥71॥

आनंदभैरवाराध्यो हयमेधफलप्रदः ।
दध्यन्नासक्तहृदयो गुडान्नप्रीतमानसः ॥72॥

घृतान्नासक्तहृदयो गौरांगो गर्वभंजकः ।
गणेशपूज्यो गगनः गणानां पतिरूर्जितः ॥73॥

छद्महीनश्शशिरदः शत्रूणां पतिरंगिराः । (शशिधरः)
चराचरमयश्शांतः शरभेशश्शतातपः ॥74॥

वीराराध्यो वक्रगमो वेदांगो वेदपारगः ।
पर्वतारोहणः पूषा परमेशः प्रजापतिः ॥75॥

भावज्ञो भवरोगघ्नो भवसागरतारणः ।
चिदग्निदेहश्चिद्रूपश्चिदानंदश्चिदाकृतिः ॥76॥

नाट्यप्रियो नरपतिर्नरनारायणार्चितः ।
निषादराजो नीहारो नेष्टा निष्ठूरभाषणः ॥77॥

निम्नप्रियो नीलनेत्रो नीलांगो नीलकेशकः ।
सिंहाक्षस्सर्वविघ्नेशस्सामवेदपरायणः ॥78॥

सनकादिमुनिध्येयः शर्वरीशः षडाननः ।
सुरूपस्सुलभस्स्वर्गः शचीनाथेन पूजितः ॥79॥

काकीनः कामदहनो दग्धपापो धराधिपः ।
दामग्रंथी शतस्त्रीशस्तश्रीपालश्च तारकः ॥80॥

ताम्राक्षस्तीक्ष्णदंष्ट्रश्च तिलभोज्यस्तिलोदरः ।
मांडुकर्णो मृडाधीशो मेरुवर्णो महोदरः ॥81॥

मार्तांडभैरवाराध्यो मणिरूपो मरुद्वहः ।
माषप्रियो मधुपानो मृणालो मोहिनीपतिः ॥82॥

महाकामेशतनयो माधवो मदगर्वितः ।
मूलाधारांबुजावासो मूलविद्यास्वरूपकः ॥83॥

स्वाधिष्टानमयः स्वस्थः स्वस्थिवाक्यः स्रुवायुधः ।
मणिपूराब्जनिलयो महाभैरवपूजितः ॥84॥

अनाहताब्जरसिको ह्रींकाररसपेशलः ।
भूमध्यवासो भूकांतो भरद्वाजप्रपूजितः ॥85॥

सहस्रारांबुजावासः सविता सामवाचकः ।
मुकुंदश्च गुणातीतो गुणपूज्यो गुणाश्रयः ॥86॥

धन्यश्च धनभृद्दाहो धनदानकरांबुजः ।
महाशयो महातीतो मायाहीनो मदार्चितः ॥87॥

माठरो मोक्षफलदः सद्वैरिकुलनाशनः ।
पिंगलः पिंछचूडश्च पिशिताशपवित्रकः ॥88॥

पायसान्नप्रियः पर्वपक्षमासविभाजकः ।
वज्रभूषो वज्रकायो विरिंचोवरवक्षणः ॥89॥

विज्ञानकलिकावृंदो विश्वरूपप्रदर्शकः ।
डंभघ्नो दमघोषघ्नो दासपालस्तपौजसः ॥90॥

द्रोणकुंभाभिषिक्तश्च द्रोहिनाशस्तपातुरः ।
महावीरेंद्रवरदो महासंसारनाशनः ॥91॥

लाकिनी हाकिनीलब्धो लवणांभोधितारणः ।
काकिलः कालपाशघ्नःकर्मबंधविमोचकः ॥92॥

मोचको मोहनिर्भिन्नो भगाराध्यो बृहत्तनुः ।
अक्षयोऽक्रूरवरदो वक्रागमविनाशनः ॥93॥

डाकीनः सूर्यतेजस्वी सर्पभूषश्च सद्गुरुः ।
स्वतंत्रः सर्वतंत्रेशो दक्षिणादिगधीश्वरः ॥94॥

सच्चिदानंदकलिकः प्रेमरूपः प्रियंकरः ।
मिध्याजगदधिष्टानो मुक्तिदो मुक्तिरूपकः ॥95॥

मुमुक्षुः कर्मफलदो मार्गदक्षोऽथ कर्मठः ।
महाबुद्धो महाशुद्धः शुकवर्णः शुकप्रियः ॥96॥

सोमप्रियः स्वरप्रीतः पर्वाराधनतत्परः ।
अजपो जनहंसश्च फलपाणिप्रपूजितः ॥97॥

अर्चितो वर्धनो वाग्मी वीरवेषो विधुप्रियः ।
लास्यप्रियो लयकरो लाभालाभविवर्जितः ॥98॥

पंचाननः पङ्चगूढः पङ्चयज्ञफलप्रदः ।
पाशहस्तः पावकेशः पर्जन्यसमगर्जनः ॥99॥

पपारिः परमोदारः प्रजेशः पंकनाशनः ।
नष्टकर्मा नष्टवैर इष्टसिद्धिप्रदायकः ॥100॥

नागाधीशो नष्टपाप इष्टनामविधायकः ।
पंचकृत्यपरः पाता पंचपंचातिशायिकः ॥101॥

पद्माक्षोः पद्मवदनः पावकाभः प्रियंकरः ।
कार्तस्वरांगो गौरांगो गौरीपुत्रो धनेश्वरः ॥102॥

गणेशाश्लिष्टदेहश्च शीतांशुः शुभदीदितिः ।
दक्षध्वंसो दक्षकरो वरः कात्यायनीसुतः ॥103॥

सुमुखो मार्गणो गर्भो गर्वभंगः कुशासनः ।
कुलपालपतिः श्रेष्ठो पवमानः प्रजाधिपः ॥104॥

दर्शप्रियो निर्विकारो दीर्घकायो दिवाकरः ।
भेरीनादप्रियो वृंदो बृहत्सेनः सुपालकः ॥105॥

सुब्रह्मा ब्रह्मरसिको रसज्ञो रजताद्रिभाः ।
तिमिरघ्नो मिहिराभो महानीलसमप्रभः ॥106॥

श्रीचंदनविलिप्तांगः श्रीपुत्रःश्रीतरुप्रियः ।
लाक्षावर्णो लसत्कर्णो रजनीध्वंसिसन्निभः ॥107॥

बिंदुप्रियोऽम्बिकापुत्रो बैंदवो बलनायकः ।
आपन्नतारकस्तप्तस्तप्तकृच्छ्रफलप्रदः ॥108॥

मरुद्धृतो महाखर्वश्चीरवासाः शिखिप्रियः ।
आयुष्माननघो दूत आयुर्वेदपरायणः ॥109॥

हंसः परमहंसश्चाप्यवधूताश्रमप्रियः ।
अश्ववेगोऽश्वहृदयो हयधैर्यो फलप्रदः ॥110॥

सुमुखो दुर्मुखो विघ्नोनिर्विघ्नो विघ्ननाशनः ।
आर्यो नाथोऽर्यमाभासःफाल्गुनः भाललोचनः ॥111॥

अरातिघ्नो घनग्रीवो ग्रीष्मसूर्यसमप्रभः ।
किरीटी कल्पशास्त्रज्ञः कल्पानलविधायकः ॥112॥

ज्ञानविज्ञानफलदो विरिंचारिविनाशनः ।
वीरमार्त्तांडवरदो वीरबाहुश्च पूर्वजः ॥113॥

वीरसिंहासनो विज्ञो वीरकार्योऽस्तदानवः ।
नरवीरसुहृद्भ्राता नागरत्नविभूषितः ॥114॥

वाचस्पतिः पुरारातिः संवर्त्तः समरेश्वरः ।
उरुवाग्मीह्युमापुत्रः उडुलोकसुरक्षकः ॥115॥

शृंगाररससंपूर्णः सिंदूरतिलकांकितः ।
कुंकुमांकितसर्वांगः कालकेयविनाशनः ॥116॥

मत्तनागप्रियो नेता नागगंधर्वपूजितः ।
सुस्वप्नबोधको बोधो गौरीदुस्वप्ननाशनः ॥117॥

चिंताराशिपरिध्वंसी चिंतामणिविभूषितः ।
चराचरजगत्स्रष्टा चलत्कुंडलकर्णयुक् ॥118॥

मुकुरास्यो मूलनिधिर्निधिद्वयनिषेवितः ।
नीराजनप्रीतमनाः नीलनेत्रो नयप्रदः ॥119॥

केदारेशः किरातश्च कालात्मा कल्पविग्रहः ।
कल्पांतभैरवाराध्यः कंकपत्रशरायुधः ॥120॥

कलाकाष्ठस्वरूपश्च ऋतुवर्षादिमासवान् ।
दिनेशमंडलावासो वासवादिप्रपूजितः ॥121॥

बहुलास्तंबकर्मज्ञः पंचाशद्वर्णरूपकः ।
चिंताहीनश्चिदाक्रांतः चारुपालोहलायुधः ॥122॥

बंदूककुसुमप्रख्यः परगर्वविभंजनः ।
विद्वत्तमो विराधघ्नः सचित्रश्चित्रकर्मकः ॥123॥

संगीतलोलुपमनाः स्निग्धगंभीरगर्ज्जितः ।
तुंगवक्त्रः स्तवरसश्चाभ्राभो भ्रमरेक्षणः ॥124॥

लीलाकमलहस्ताब्जो बालकुंदविभूषितः ।
लोध्रप्रसवशुधाभः शिरीषकुसुमप्रियः ॥125॥

त्रस्तत्राणकरस्तत्त्वं तत्त्ववाक्यार्थबोधकः ।
वर्षीयांश्च विधिस्तुत्यो वेदांतप्रतिपादकः ॥126॥

मूलभूतो मूलतत्त्वं मूलकारणविग्रहः ।
आदिनाथोऽक्षयफलः पाणिजन्माऽपराजितः ॥127॥

गानप्रियो गानलोलो महेशो विज्ञमानसः ।
गिरीजास्तन्यरसिको गिरिराजवरस्तुतः ॥128॥

पीयूषकुंभहस्ताब्जः पाशत्यागी चिरंतनः ।
सुधालालसवक्त्राब्जः सुरद्रुमफलेप्सितः ॥129॥

रत्नहाटकभूषांगो रावणादिप्रपूजितः ।
कनत्कालेयसुप्रीतः क्रौंचगर्वविनाशनः ॥130॥

अशेषजनसम्मोह आयुर्विद्याफलप्रदः ।
अवबद्धदुकूलांगो हारालंकृतकंधरः ॥131॥

केतकीकुसुमप्रीतः कलभैः परिवारितः ।
केकाप्रियः कार्तिकेयः सारंगनिनदप्रियः ॥132॥

चातकालापसंतुष्टश्चमरीमृगसेवितः ।
आम्रकूटाद्रिसंचारी चाम्नायफलदायकः ॥133॥

धृताक्षसूत्रपाणिश्चाप्यक्षिरोगविनाशनः ।
मुकुंदपूज्यो मोहांगो मुनिमानसतोषितः ॥134॥

तैलाभिषिक्तसुशीरास्तर्जनीमुद्रिकायुतः ।
तटातकामनः प्रीतस्तमोगउणविनाशनः ॥135॥

अनामयोऽप्यनादर्शश्चार्जुनाभो हुतप्रियः ।
षाड्गुण्य परिसंपूर्णस्सप्ताश्वादिगृहैः स्तुतः ॥136॥

वीतशोकःप्रसादज्ञः सप्तप्राणवरप्रदः ।
सप्तार्चिश्च त्रिनयनस्त्रिवेणीफलदायकः ॥137॥

कृष्णवर्त्मा वेदमुखो दारुमंडलमध्यगः ।
वीरनूपुरपादाब्जो वीरकंकणपाणिमान् ॥138॥

विश्वमूर्तिश्शुद्धमुखश्शुद्धभस्मानुलेपनः ।
शुंभध्वंसिन्या संपूज्यो रक्तबीजकुलांतकः ॥139॥

निषादादिस्वरप्रीतः नमस्कारफलप्रदः ।
भक्तारिपंचतादायी सज्जीकृतशरायुधः ॥140॥

अभयंकरमंत्रज्ञः कुब्जिकामंत्रविग्रहः ।
धूम्राक्षश्चोग्रतेजस्वी दशकंठविनाशनः ॥141॥

आशुगायुधहस्ताब्जो गदायुधकरांबुजः ।
पाशायुधसुपाणिश्च कपालायुधसद्भुजः ॥142॥

सहस्रशीर्षवदनः सहस्रद्वयलोचनः ।
नानाहेतिर्धनुष्पाणिः नानास्रग्भूषणप्रियः ॥143॥

आश्यामकोमलतनूरारक्तापांगलोचनः ।
द्वादशाहक्रतुप्रीतः पौंडरीकफलप्रदः ॥144॥

अप्तोर्यामक्रतुमयश्चयनादिफलप्रदः ।
पशुबंधस्यफलदो वाजपेयात्मदैवतः ॥145॥

आब्रह्मकीटजननावनात्मा चंबकप्रियः ।
पशुपाशविभागज्ञः परिज्ञानप्रदायकः ॥146॥

कल्पेश्वरः कल्पवर्यो जातवेदा प्रभाकरः ।
कुंभीश्वरः कुंभपाणीः कुंकुमाक्तललाटकः ॥147॥

शिलींध्रपत्रसंकाशः सिंहवक्त्रप्रमर्दनः ।
कोकिलक्वणनाकर्णी कालनाशनतत्परः ॥148॥

नैय्यायिकमतघ्नश्च बौद्धसंघविनाशनः ।
धृतहेमाब्जपाणिश्च होमसंतुष्टमानसः ॥149॥

पितृयज्ञस्यफलदः पितृवज्जनरक्षकः ।
पदातिकर्मनिरतः पृषदाज्यप्रदायकः ॥150॥

महासुरवधोद्युक्तः स्वास्त्रप्रत्यस्त्रवर्षकः ।
महावर्षतिरोधानः नागाभृतकरांबुजः ॥151॥

नमः स्वाहावषट् वौषट् वल्लवप्रतिपादकः ।
महीरसदृशग्रीवो महीरसदृशस्तवः ॥152॥

तंत्रीवादनहस्ताग्रः संगीतप्रीतमानसः ।
चिदंशमुकुरावासो मणिकूटाद्रि संचरः ॥153॥

लीलासंचारतनुको लिंगशास्त्रप्रवर्तकः ।
राकेंदुद्युतिसंपन्नो यागकर्मफलप्रदः ॥154॥

मैनाकगिरिसंचारी मधुवंशविनाशनः ।
तालखंडपुरावासः तमालनिभतैजसः ॥155॥

श्रीधर्मशास्तासहस्रनामस्तोत्रं संपूर्णं ।